टीका [illegible]

जगद्गुरु कविनागरि

तम्रुजी हजोविंद कावाम्

अलंकार संख्या

१ उपमालंकारः

२ विरोधनामालंकारः

३ सहोक्तिनामालं॰

४ आक्षेपोपमलंकारः

५ उत्प्रेक्षालंकारः

रूपकोपमलंकारः

श्लेषोलंकारः

ग

श्रीमते रामानुजाय नमः ॥ करकलितभुजंगो मस्तकन्यस्तगंगो विहितदहनरंगो दत्तदैत्येभभंग

ः चिरविगलितदर्पो गोत्यक्तसंगोंऽगनानां भवतु मम विभूत्यै शंभुरुन्मत्तगंगः ॥१॥ नानाटीकाः समालो

च्य हृद्या गीतगोविंदटीकेयं क्रियते श्रीजगद्धरैः ॥२॥ इह कविर्निर्विघ्नप्रारिप्सितसमाप्तिमुद्दिश्य

स्वेष्टदेवताकीर्त्तनरूपं मंगलं विधित्सुर्मंगलाचारलक्षणीभूतं वस्तुनिर्देशमपि कटाक्षयति

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इ-

त्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रंकेलय हः

ः ॥१॥ राधामाधवयोः रहःकेलयो जयंति गोपीविप्रायकस्य पोरेकांतक्रीडितानि उत्कर्षेण व

र्त्तंतामित्यर्थः । राधा च माधवश्चेति चार्थे द्वंद्वः । राधा काचिद्गोपी तथा च विश्वः राधा वैशा

खमासः स्याद्राधा गोप्यां च विद्युति । मा लक्ष्मीस्तस्या धवो माधवः । पक्षे मध्योरपत्यं माधव एम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी॰गो॰टी को ऽस्तीत्याह स्मरत् के॰ चित्तवृत्तं १६ कोमलं॰ पञ्चालेदमील्यरितिं व्याख्यातितत्र दिवैवावं मिदेशाऽ स्यमिधाय
दिनस्यैवमेघावृतगगनत्वाद्दिनारात्रित्वमुपचरितं मिमूचिरस्त ल मेघावृतगगनत्वात् दिवसत्रि
२ अपि दिनेगगनाप्रावीराप्यस्याप्रतीतत्वात्वात् तत्र रात्राविवापं लिदे शाऽत्र नोक्तदोषः तस्मात् दिमंकुसं
हेरादेत्वमेव गृहं प्रापय एवं प्रकारेणानंदस्यान्यस्मिन्निवृत्ताभावः सूचितः सांद्रस्निग्धनमेदुरमिति
धराणि: निकुंजकुंजनौवा क्रीडेलतादिपिहितो देश इत्यमरः एकांतार्थं रहोव्ययमितिच मा च ल
२ क्ष्मीर्निगघवहल्लेकाह्वरकोष: आज्ञा निदेशआदेश इत्यमरः द्रुमं मिल्य स्वादि दुग्नन्त दुर्धरानिस्सृ
त्यात्काचिदनर्थितस्यापीतिराधापदः पूर्वनिपातः तथा लक्ष्मीनारायणौ पार्वतीपरमेश्वरौ चेति मे
पश्चा पूर्वनिपातविधिरनित्य एवं पश्चा एधमते सा धते आकांक्षितमनन्यते सुसंस्कारा राधा लक्ष्मी २
: सा समाहत्वेन कविनोपचरितं ततोमात्र गौरवं मिदं दुरधिकामिति तस्यापवादमहितंतस्यापूर्वनि पम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्यामित्यादिनाशीर्वादः। जयतीत्यादिसंज्ञायां लोट्। उत्कीर्णाभावश्चाभिधानादेवकीडाद्देशमाह यमुना
कूले कालिन्दीतटे कीदृशयो राधामाधवयोः नन्दनिदेशतो नन्दाज्ञावशात् चलितयोर्गच्छतोः। नन्दो गोपविशेषः के
प्र अभिकल्प्य कुञ्जद्रुमं अध्वनि मार्गे कुञ्जद्रुमो ऽध्वकुञ्जद्रुमं प्रति अभिप्रति अभिमुखं इति कर्मधारय
संज्ञायां द्वितीया। अथवा वीप्साया भावः अध्वनि कुञ्जद्रुमे ऽध्वकुञ्जद्रुमे रहःकेलयो जयन्तीति व्याख्यानं पाठ
अध्वा च कुञ्जद्रुमश्च तान् प्रति लक्षीकृत्य चलितयोरित्यर्थः। सर्वत्रैकं द्वौ विभाव्य एकवद्भवति पाठ अ
ध्वनि कुञ्जेन लतापिहितो द्रुमः गृहे लताच्छादितो द्रुमो ऽध्वकुञ्जद्रुमस्तं प्रतीति। इत्थंभूतस्य स्वरूपमाह मे
घैरिति जलधरैर्गगनतलं मेदुरं सान्द्रं श्यामं इत्यर्थः। तथा विपिनभूमयस्तमालद्रुमैः श्यामाः
कृष्णाः एतेनाध्वनो निबिडान्धकारत्वं ध्वनितं तथा नक्तं रात्रिसमयः एतेन गमनं प्रति विषमा
त्वं सूचितं तथापि किमित्यर्थं न यातीति किमपि भविष्यतीत्याह भीरुः त्वं अयं कृष्णो भीरुः भयपु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी०टी० श्रेनमा धाति धीमंतोमधुनेवमधुव्रताद्दृतिहंरी कोमललतासुकुमारतैव सुप्रयोगैर्महत्त्वदैर्युतमम
स्पष्टसंधिभिः सुकुमारंतसंयुक्तं सुकुमारातदुःश्रतइतिलीलारविंदं यन्मनःश्रोत्रविशुद्धप्रहार
४ जनकं भवेत शब्दबंधत्वयोगेन तत्कांतमिति कीर्तितम् श्रृंगाररसप्राचुर्यान्मधुराः इति बोध न
त्वा कोमलागीतगेयत्वात्कांतेत्यभिप्रयोष्यं हारस्मरणेकृष्णचिंतनेयदिमनः सानुरागं विलास
कलासुच नुः पदिव्यासुकलासुविभ्रमा चारिभुवायात्दिकुतूहलं कौतुकमभिलषितदाश्यवित्त
३ र्थः तत्रप्रियसमीपगमनस्थानांतरविलोकयेभुवि कायेकौस्मात्क्रोधः स्मितचकोराशुकूलनं त
चपत्नरविलासः तत्तुकंमद्रासिक सर्वत्वे सवलतिवकुलंपाहन्यासोविलोकितमन्यतः स्थिर
मपितघाकस्मीभोजंप्रयातिविकूलनम् स्मितसुधाम्यर्थः कोयोहृथैवचमाकृतिदृपितस
विधंयांत्यास्ता त्याविलासरसोहृयमिति कलांचंद्रंकालास्याक्रीडनाहिविंतिविष्णुः गीर्वाग्वाणी एम ४
कलायां च वि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गीतः पक्षे पद्मावतीति रूपवधूस्तस्याश्चरणचारणेन पदक्रमप्रमाणेन नर्तनरूपेण कुशलतया नृपवराग्रे
भगवदग्रे पद्मावती नाम्नी स्वभार्यां स्वीयमेव नर्तयतीत्यर्थः पक्षे निजवधूचरणसंवाहनेन नृप
इव तद्गमनकमलापदसंवाहनेन धनवत्त्वं सूचितं पक्षे निजवधूवशतया चान्यस्त्रीवैमु
ख्यं शृंगारित्वं च दर्शितं निजशृंगारित्वेन चास्य काव्यस्य शृंगाररसप्राधान्यत्वं दर्शितं प्रयुक्तं चैतत्
शृंगारी चेत्कविः काव्ये जातं रसमयं जगदिति· चारणस्तु कुशीलवा इत्यमरः चक्रवर्ती श्रे
पुं ष्ठः कविः सेन्तरयां गत्वा रतिविघ्नः अथ कविरेतस्य निजग्रंथस्य श्रवणे प्रयोजनमाह यदि
हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् मधुरकोमलकांतपदावलीं शृणु तदा
जयदेवसरस्वतीम् ५ तदा जयदेवसरस्वतीं शृणु आकर्णयेति श्रोतृजनान्प्रतिवचनं कीदृशीं
मधुरा सरसा कोमला मृदुला कांता मनोहरा पदपंक्तिर्यत्र तां मधुरं रसवद्वाचि वस्तुन्यपि रसोऽस्तीति·

६

ग्री·टी० चेतानि तत्त्वमेयच कामीति कर्मधारयः तैरेवाप्येगोवर्धनस्पर्धी कोपि न स्यात आकर्शि
तोवाग्भाचार्यश्रीगोवर्धनः शृंगारप्रधानकाव्यं जनयति स्मा अस्य मर्म जानातीति भावः धोयीनामकवि
५ नृपः श्रुतिधरः श्रुत्वा ग्रहणमात्रेण गृहीतान पुनरर्थानिति स्योदिग्रहणे अश्रवीणादुत्पाश्रयः एतेना
न्येके च नापि महाकवयो न जयदेवतामप्यवधात् मीशान्तद्भूतिनदीपकवित्वे महाकाव्यलक्ष
५ णमस्तीति ध्वनितं तत्तु विशिष्टेशाद्यर्थो काव्ये विशिष्टं च निर्दोषत्ववत्सालंकारत्वेमित्वे
सति रसवत्त्वं तदुक्तं सरस्वतीकंठाभरणे निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम् रसान्वि व
तं कविः कुर्वन्कीर्तिं प्रीतिं चाविंदति इति कविरघुनाहरेः संसारस्थितोनिदानत्वमुक्त्वा वम
प विघ्नभंगपूर्वकप्रारीप्सितसमाप्तिप्राप्तिकारणं दशावतारकथनरूपं मंगलमाह प
घपि मांगल्यं मननिबद्धमेवेतीहतस्मिन्धनमफलं तथापि बहुविघ्नसंकाबहुमंगलाच एम
२२१ मंगलमा ५
५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सरस्वतीस्मरः कविरघुनामहाप्रशंसावसरेलक्ष्मणसेनदेवेनहिनिरूपितइतिमुदीपकविलं
गुणादिकमस्तीतिद्योतयन्निजग्रंथमहात्म्यमाह वाचःपल्लवयत्युमापतिधरः संदर्भशुद्धिंगिरांजा
नीतेजयदेवएवशरणःश्लाघ्योदुरूहद्रुतेः शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धीको
ऽपिनविश्रुतःश्रुतिधरोधोयीकविक्ष्मापतिः ॥ उमापतिनामाकविःपल्लवविरचनानिपरंवि
स्तारयति नतुगुणादिकंवेत्तीत्याशयः पल्लवनं विस्तारं करोतीति तत्करोतीति णिच गिरांवाचांसंदर्भ
शुद्धिंग्रथनविशुद्धिंजयदेवएवजानातिनान्यइत्याशयः संदर्भशुद्धिश्चार्थेनप्राग्देवेनप्रभवगि
तदुभयंजानातीत्यर्थः शरणनामाकविर्दुरूहद्रुतेर्विषमार्थस्यसत्वरोदीरणेनश्लाघ्यःप्रशंस्यः ॥ दु
दुःखेनोह्यतेदुरूहंतत्रद्रुतिः शीघ्रतादुरूहमपिपदंजानातिशीघ्रंवकुंशक्नोतीतिभावः शृंगारेणोत्
त्तरः प्रधानंयेप्रमेयास्तानित्यर्थास्तेसंतिउत्कृष्टानिचतानिप्रमेयाणिचेतिसत्प्रमेयाणिशृंगार२प्रधानानि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जलदाभम्· हलहतिभीतिमिलितयमुनाभम्· ८· केशवधृतहलधररूप जय जगदीश हरे निंदसि यज्ञवि
विधेरहह श्रुतिजातम्· सदयहृदयदर्शितपशुघातम्· ९ केशवधृतबुद्धशरीर जय जगदीश हरे· म्लेच्छ
निवहनिधने कलयसि करवालम्· धूमकेतुमिव किमपि करालम्· १० केशवधृतकल्किशरीर जय जग
दीश हरे· श्रीजयदेवकवेरिदमुदितमुदारम्· शृणु सुखदं शुभदं भवसारम्· ११ केशवधृतदशविधरूप
जय जगदीश हरे· हे केशव केजले शेते इति त्रिजगतो तथाविध हे जगदीश जगत्प्रभो गृहीतमत्स्यदेह ह
रे जय उत्कर्षेण वर्तस्व· यद्वा केशिनमसुरं भेदे हतवान् तदेतम्भोः पृषोदरादिः केशव केशवेति गीतत्वा र्थः
द्विरुक्तिः प्रलयपयोधिजले कल्पान्तसागरपानीये वेदं धृतवानसि वहसि· अखेदमपरिश्रमं य
था स्यादेवं कथं धृतवानित्याह· विहितेति विहितं कृतं वहित्रचरित्रं सागरतरणहेतुः नौचेष्टितं यत्र तथा
रा क्रियायां तत्तथेदमपि क्रियाविशेषणम्· उभयक्रियाविशेषणत्वेन क्लीबत्वादिकं द्वितीयान्तत्वकर्मत्वे राम्भः
क्लीबत्वे च तथैकता· क्रियाविशेषणस्यैवमतिसूरिभिरादरादितिश्रुतेन जलेवस्थानं योग्यतासूचिता· ९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रंगं युज्यत एवेति नोक्तदोषः गीतस्यास्य मालवो रागः रूपकस्तालः रागलक्षणम्॥ नितंबिनीचुंबितवक्त्रपद्मः
शुकद्युतिः कुंडलवान्प्रमत्तः संकेतशालां प्रविशन्प्रदोषे मालाधरो मालवरागराजः ॥७॥ प्रलयपयोधिजले धृ
तवानसि वेदम्॥ विहितवहित्रचरित्रमखेदम्॥ १ केशवधृतमीनशरीर जय जगदीश हरे॥ ध्रुवपदम् क्षिति
रति विपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे॥ २ केशवधृत कच्छपरूप जय जगदी
१ श हरे वसति दशनशिखरे धरणी तव लग्ना शशिनि कलंककलेव निमग्ना॥ ३ केशवधृत सूकररूप
जय जगदीश हरे तव करकमलवरे नखमद्भुतशृंगम्॥ दलितहिरण्यकशिपुतनुभृंगम्॥ ४ केशव
धृत नरहरिरूप जय जगदीश हरे॥ छलयसि विक्रमणे बलिमद्भुतवामन॥ पदनखनीरजनितजनपा
वन॥ ५ केशवधृतवामनरूप जय जगदीश हरे॥ क्षत्रियरुधिरमये जगदपगतपापम्॥ स्नपयसि पयसि
शमितभवतापम्॥ ६ केशवधृत भृगुपतिरूप जय जगदीश हरे॥ वितरसि दिक्षु रणे दिक्पतिकमनीयम्॥
दशमुखमौलिबलिं रमणीयम्॥ ७ केशवधृत रामशरीर जय जगदीश हरे॥ वहसि वपुषि विशदे वसनं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वसतीतिधृतवराहरूपदशनशिखरेदंताग्रतत्रधरणीसंल[illegible]वसतिकीदृशीचंद्रेंतर्गताकलंककले
रेखेव अग्रेशिखरंभीत्याक्रुरदूरंशृंगेपितन्मतमितिधरणिः दशनोद्गमितोदं इति· ३ तवेति धृतनरहरि
रूपहरिः सिंहः त्वं तवहस्तपद्मश्रेष्ठेनखमस्तिकीदृशम्· अद्भुतमाश्चर्यजनकंशृंगमग्रभागोयस्यत
तथाक्वचित्कमलदलइतिपाठःसतुमनोहरः शृंगंप्रभुत्वशैलाग्रेचिह्नेक्रीडाम्बुपायकेविषाणोत्कर्षयोः
चाग्रेशृंगंस्यात्स्त्रियांवैरीपर्वकइतिविश्वः आश्चर्यहेतुमाह दलितविदारितंहिरण्यकशिपोःशरीरंभृंगएव
भृंगलखेनतत्तथा अन्यत्रभ्रमरेणकमलाग्रंदृश्यते इहतुसएवतेनदलितइति· वैपरीत्येनाश्चर्यं यद्वा अन्यस्म
न्पद्माग्रमतिकोमलंरदंतु पुनरस्मादृशमहासुरवक्षस्थलकपाटपाटनपटुतरमिति चित्रम् नखोस्त्रीनख
रस्त्रिष्विर्यमरः स्त्रियांमूर्त्तिस्तनुस्तनूरितिच· ४ छलयसीतिधृतवामनरूपहे आ[illegible]र्यहेतुवामनवि
क्रमेरो४ विक्रमावस्थायांवलिमसुरराजंछलयसिविप्रंचयसिकीदृशाः पदनखनीरेणपादनखार्द्र राम:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ल

महाप्रलयकाले भगवान्वेदं स्वीकृत्य सृष्टिकाले ब्रह्मणोरगमुखाद्य तस्मै तं प्रयच्छति तथा श्रुतिः यो ब्रह्माणंर
विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति यद्वा कीदृशं वेदं विहितं तव हितं स्वरूपो तस्य चरित्रं निवयेन
वर्त्तितं हि सागरतारकं वेदोपि नित्यनैमित्तिककाम्यकर्मप्रतिपादकतया संसारसागरतारकत्वात्ता
त्पर्यमिति भावः किं तिरिति धृतं कच्छपदेह तव पृष्ठे मेदिनी वसति कीदृशे विपुलतरे ऽत्यर्थं महति इहतर
वंत विपुलशब्दे अत्यंतानि शायद्योतनायातिशाद्वः स्वार्थे तरप्रिकृतेऽतिशायार्थोऽतिशाद्वः प्रयुज्यते यद्वा
भ्रति कांतो विपुलतरोऽतिशायपदार्थोऽयेभ्यस्तादृशे यद्वा तेषु दृष्ट्वीं तथाप्यतीतिवच्छिन्न कम एवातिशाद्वः
तेनाति किं तिरश्चैत्यं धृतभूमिरिति वा चतति तिष्ठति चतास्थेन तिष्ठतीति वा चतिधरणीधरणमिति वा ला
न्वयः एतेन धारणायोग्यता दर्शिता पुनः कीदृशे भूमिवहने नयः किरणो मृतः शोणितग्रंथिः स एव चक्रे
च क्रारत्वात्तेन गरिष्ठे गरीयसि संततोद्वहनेनेरक्तपिंडः किणोउच्यते तदुक्तं किणः स्यान्मृतशोणितः र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी.गो.टी.

राम:

८

बलिः पूजोपहारयोरितिशाश्वतः मौलिः किरीटेधम्मिल्लेकंकेलिद्रुतयोरिति शाश्वतः कीदृशं दिक्पतीनामिंद्रादीनां का
म्यमिष्टोविषयंयेन एतेनतेभ्यएवबलिनं इत्यासीतिदर्शितम् पुनः कीदृशं रमणीयं मनोहरमित्यर्थः दशनानामेव दशाद
नाद्यादशामुखान्यस्य दशमुखोरावणः ८ धृतबलभद्ररूप विशदे शुभ्रे वपुषिशरीरे वसनं धारयसि कीदृशं जलदाभं
रूक्षं मेघसदृशमित्यर्थः पुनः कीदृशं हलहतिभीत्या लांगलाघातभयेन मिलिताया उपस्थिताया यमुनायाः स्वभा
दीप्तिर्यस्यतत्तथा एकदाहिनिजबंधुवर्गसंपालनार्थं वृंदावनगतस्य गोपवृंदैः सह मधुपानमग्नेन मत्तेन चैतेनस्नाया
हूता यमुनासाच मत्तोयमिति नायाता ततश्चैतेन क्रोधेन हलेन यमुनाया आकर्षणं कृतमिति पुराणवार्ता यमुना
याजलं नीलमिति श्यामवाससाम्यं हतिर्हननं क्वचित्का इतुनासिकमेलो ८ धृतबुद्धशरीर क्रतुविधानस्य वे
दजातं इवयसि निंदा हेतुमाह दर्शितः प्रतिपादितः पशूनां घातः छागादीनां घातो वधो यत्र यत कीदृशः सदयहृद
दयकरुणाद्यगतिविन ततत्वानिंदा अहिंसापरमोधर्म इति सिद्धांतवतो दयायुक्त हृदयस्य तवदर्शितं पशुमाल

राम:

८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संबंधिजलेन जनितं कृतं जनानां लोकानां पावनं पावित्र्यं येन। बलिछलनार्थं द्विपं चाराद्वं गुल्फपरिमा
णाधारिणो हरेर्ब्रह्मांडपर्यंतगं तृतीयचरणं कमंडलुजलेन ब्रह्मणा प्रक्षालितम् अतस्तन्मदनखनी
रगंगा तत्स्नानाज्जनानां पावित्र्यं युज्यत एवेति। पुराणावर्णी अद्भुतताच सर्ववामनीभूय पश्चाद्वा
मन इति। तदुक्तं हरिवंशे पारोणी तु पतिते तैर्ययेकेशावो भूद्वामनः यद्वा वामनस्य तृतीयचरणेन ब्रह्म
लोकलंघनमेवाद्भुतजनकम्। अंभोर्णस्तोयपानीयनीरक्षीरांबुशंबरमित्यमरः ५ क्षत्रियेति धृतपर
शुरामरूप जय। क्षत्रियद्रोहिणः। तद्विकारे पानीये कुरुक्षेत्रादितीर्थे जगत्पयसि स्नानं कारयसि स्नानफलमाह उप
य गतपापं गतकलुषमित्यर्थः अन्यच्च शमितो भवभौम्य संसारस्य तापो येन तत्त्रया आधिदैविकमाधिभौतिकमाध्यात्मिक
मितितापत्रयमन्यदपि स्नानं पापं हरति तापं च गर्भाद्यं नाशयतीति ध्वनिः। रुधिरमय इति विकारार्थे तत्प्रकृतवचने मयट्
वितरसीति धृतरामशरीररूप जय रणे संग्रामे दशमुखमौलिबलिं रणरणकोटिप्रहारं दिक्षु आशासु ददासि ककुभां अरदोस्ता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मप्यर्थं श्लोकेनाह वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिंछलयते क्षत्रक्षयं कुर्वते पौलस्त्यं जयते हलं कलय
ते कारुण्यमातन्वते म्लेछान्संहरते दशाकृतिकृते कृष्णाय तुभ्यंनमः कृष्णायनमोस्तु कीदृशाय वेदानुद्धरते मीनरूपेण जगंति
भुवनानि वहते कूर्म्मरूपेण भूगोलं त्रिकोणाकृति तया गोलकमिव भ्रमित्वा ऊर्द्धधारयते वराहरूपेण दैत्यं दारयते हिरण्यकशि
पुं विदारयते नृसिंहरूपेण बलिंछलयते वंचयते खर्वरूपेण क्षत्रक्षयं कुर्वते क्षत्रियनाशकाय परशुरामरूपेण पौलस्त्यं रावणं
जयते रामरूपेण हलं कलयते धारयते बलरूपेण कारुण्यं करुणामातन्वते विस्तारयते बुद्धरूपेण म्लेछान्विनाशयते क
ल्किरूपेण अतएव दशाकृतिकृते दशविधरूपधारिणे सर्वपदं शब्दतं कविरिदानीं मंगलगीत्या सकलविघ्नशांत्यर्थं हरिं स्तौ
ति श्रितेत्यादि गीतस्यास्य गुर्जरीरागः प्रतिमठतालः रागलक्षणं च श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पसंस्था
श्रुतेः स्वराणां दधती विभागं तंत्रीमुखा दक्षिणगुर्जरीयम् १ श्रितकमला कुचमंडल धृतमंडलये२ कलितललितवनमाल १
जय २ देवहरे ध्रुवपदम् दिनमणिमंडलमंडन भवखंडनये२ मुनिजनमानसहंस जय० २ कालीयविषधरगंजन जनरंजनये२
यदुकुलनलिनदिनेश जय० ३ मधुमुरनरकविनाशन गरुडासनये२ सुरकुलकेलिनिदान जय० ४ अमलकमलदललोचन भव
मोचनये२ त्रिभुवनभुवननिधाने जय० ५ जनकसुताकृतभूषण जितदूषणये२ समरशमितदशकंठ जय० ६ अभिनवजलधरसुं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भेतत्यास्रुतो बोधित पशुघातायां प्रकर्षेणानिंदाभवतीति [illegible] अहहेत्याह: प्रकर्षे अहह कष्टं आदन्तगोमम रिंस्केश प्रकर्षयोरिति विश्वः अ
द्भुते वा अहहेत्यद्भुतेखेदे इत्यमरः तच्च पशुवधं वयज्ञविधानं पशुघातं संपदिंशसि मत्स्यांतरेशा पुनस्तां त्रिदंसातीति वित्तमेव धृतकल्कि
शरीर संहाररूपम्लेछ अव्यक्तेवाचे अव्यक्तं वदंतीति म्लेछाः शेषतज्जनभेदस्य प्रसिद्धः अत्यन्तसंमूहं मारणानिमित्तं करवालं खड्गं कलयसि
धारयसि कलिर्धारणार्थेपि कलि वलि कामधेन्व इति वैयाकरणाः कमिव धूमकेतुमिव औत्पातिकधूमकेतुं युक्ततारकामिव पुनः
धूमकेतुचिह्नं यस्य सधूमोऽग्निरित्यर्थः तमिव खड्गस्य नीलत्वात् सधीदेः स्वर्णमयत्वात्सधूमाग्निसाम्यं कीदृशं किमप्यनिर्वचनीयं करा
लं भयानकं करालो दंतुरे तुंगे कराले भीषणोपि चेति च शाश्वतः अग्न्युत्पातो धूमकेतु इत्यमरः निधन इति निमित्तात्कर्मयोगे सप्तमीति विष
य सप्तमी करवालो मतः खड्गे करवालो भयानक इति धरणीः १० धृतदशविधरूप दशप्रकारशरीर जय इदं श्रीजयदेवकवेरुदितं भाषितं
शृणु आकर्णय हे लोकेत्यवधार्य कीदृशं उदारं मनोहरं महत्वयुक्तं वा पुनः कीदृशं सुखदं सुखप्रदत्वात् श्रुतिमनसोः सुखदायकम् शुभं क
ल्याणदायि हरिचरितनादतस्वव भवसारं संसारे धनरूपं न्याय्यं श्रेष्ठं वा सारो बलेस्मज्जानि स्थिरांशे न्याय्ये च नीरे च धने च सारम् श्रेष्ठे च
सारं खलु वर्णयतीति इतिविश्वः एतद्धि चरितमाहात्म्यात्सुखं ददातीत्यातो नुपसर्गात्कः विधा विधौ प्रकारे इत्यमरः मत्स्यकूर्मो व
राहश्च नारसिंहोथ वामनः रामो रामश्च रामश्च बौद्धः कल्कीच ते दश। कविरिदानीं मतिवैभवतया हरिकीर्तनोत्सुकः पूर्वगीतप्रतिपादित

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नीरीचतानित्रिभुवनानिचेतित्रिभुवनं तत्रनिधाननिधिरिव आनंदजनकत्वादनिर्वचनीयत्वाच्चेत्यर्थः पत्रंपलाशंछदनंदलंप र्णंछदः पुमानित्यमरः जनकसुतायाः सीतायास्तथाकृतभूषणविहितालंकारा जितोदूषणोनामराक्षसोयेन य द्वा जितंदूषणंपापमपियेनतिः पापेत्यर्थः समरेसंग्रामेशमितोमारितोदशकंठोरावणोयेन अभिनवजलधरवत् न वीनमेघवत्सुंदरमनोज्ञधृतोमंदरोगिरिविशेषोयेनश्रियोलक्ष्म्यामुखंचंद्रइवतत्रचकोरःपक्षिविशेषः चकोरेणाहिहिमकरकव लनंक्रियतेइतिवार्त्ता कमलाश्रीर्हरिप्रियाइत्यमरः तवेत्यादि एवंभूतहरेतवचरणेवयंप्रणताः अतीवनम्राइतिभावयजा नीहिप्रणतेषुभाद्रेशेषुकुशलंकल्याणंकुरु कुशलंक्षेममस्त्रियामित्यमरः इदंपदमाधिकमपिक्वचित्पुस्तकेदृश्यतइतिव्याख्या तम् श्रीजयदेवकवेरिदंमंगलंगीतंविशेषेणसुखंददत्कुरुतेऽस्थिरायतां आश्रावतांच कीदृशं उज्वलतानुगमनेनरम्यागीतिर्गानं यस्यतत्तथाम्भृतकमलेपादौमिश्चेतितस्वेणकांतस्यपूर्वनिपातः कलितललितस्पादौवकुब्वेकस्यनियमइत्येकस्यैवप्राङ्नि पातः मधुसूरेतिपदेविनाशनासनशब्दयोस्तालव्यदंत्यवत्तो अनुप्रासोनभवतीतिनवाच्यंनागरानुप्रासेतथात्वात् अधु नावसंतवर्णननिव्याजेनकृष्णक्रीडांवक्तुकामः साधूक्तविरह पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरोमधुसूद नस्य व्यक्तानुरागमिवखेलदनंगखेदस्वेदांबुपूरमनुपूरयतुप्रियंवः १ मधुसूदनस्यलक्ष्मस्योरो वक्षस्थलंकर्तृवोयुष्माकंप्रि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दरधृतमंदरये २ श्रीमुखचंद्रचकोर जय० ७ तवचरणे प्रणता वयमिति भावय ये २ कुरु कुशलं प्रणतेषु जय० ८ श्रीजयदेव
कवेरिदं कुरुते मुदयम् मंगलमुज्ज्वलगीतम् जय० देवहरे ९ देवहरे जय २ त्वच्चरणापतितजनोद्धरणात्सर्वोत्कृष्टतया वर्द्धत्वेन
र्थः आदराद्धितात्मिः नमो नमः शिवायेत्यादाविव यथा संभ्रमरूपेणागीतत्वाद्धितात्मिः कीदृशः श्रितमालिंगितं कमलायालक्ष्म्या
स्तनमंडलं येन तादृशाश्रितो कुंडले येन कलितानि धृतानि ललितामनोहरा वनमाला येन आपादपातिनीं मालां वनमालां विदुर्बुधा
इति शाश्वतः पुनः कीदृशः आदित्यमंडलालंकरणाकारक नंद्यादित्वाल्ल्युः सूर्यमंडलेकृतावस्थानं ध्येयः सवितृमंडलमध्यवर्ती
र्ती नारायणः इत्यादिश्रुतेः दिनमणिस्तरणिरेवं दिनप्रणीति हारावली संसारखंडनविच्छेदकयुक्तित्वात् मुनिजनानां मुनि
प्रभृतीनां मानसानि सरांसीव तेषु हंस इव यथा मुनिजनानां मानसेषु हृदयेषु हंसः परमात्मा स्वरूप परब्रह्मस्वरूपेत्यर्थः हंसो वि
हंगभेदस्यात् परमात्मनि योगिनीति विश्वः कालीयनाम्नो विषधरस्य सर्पस्य गंजनहिंसकजनानां रंजनं यदुकुलं
कुलं नलिनकमलमिव तत्र दिनेशः सूर्यः प्रकाशकत्वात् वापुंसि पद्मं नलिनमरविंदं महोत्पलमित्यमरः मधुश्च मुरश्च नरकश्च
तेषां दैत्यानां विनाशनघातक गरुडः पक्षिराजः स एवासनमुपवेशनं यस्य सुरकुलानां देववंशानां केलेः क्रीडायाः निदाना
दिकारणा निदानं त्वादिकारणमित्यमरः अमलकोमलं यन्निर्मलपद्मपत्रमिव लोचनं चक्षुर्यस्य भवस्य जन्मनो मोचन खं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी.गो.टी.
रामः

त्तीक्ष्णशरेण कंसानुसरणं कंसानुसंधानं पयातां श्रमं हत्तु कं पथा भवति तथा कामपीडोत्पादि मनस्तापाच्च तया पातीं
उत्कंठतीवांधापीडा यस्यां तां चलक्षाला मिस ---------------

10

रामः
११

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यमभीष्टमनुग्रहयतु संस्फुरां करोतु कीदृशम्मुरः पद्मापयोधरतटीलक्ष्मीस्तनपरिसरस्य परिरंभेणालिंगनेन अंतर्यत्का-
श्मीरं कुंकुमं तेन मुद्रितं चिह्नितं ममैवेदं मुरारे हृदयं न तत्वमपर इति कृत्वा लक्ष्म्या मुद्रितमिति भावः काश्मीरं कुंकुमं प्रोक्तं टंक-
पुष्करमूलयोरिति विश्वः पुनः कीदृशं भक्तानुरागामिव अंतरेऽनुराग बहिर्विहितमिव यत्र अनुरागस्य कविसंप्रदाये लोहित-
त्वात्साम्यं पुनः कीदृशं खेलाखेलगति कुर्वन्तो नेत्रगत्तस्य स्वेदेन पुरतापासेन घर्मजलप्रवाहो यत्र तत्तथा पूरो जलप्रवा-
हस्यात्प्राणसंशुद्धिरगाधयोरिति विश्वः लक्ष्मीत्कंठितायास्तमैवाप्य तु संतप्ताराधायाः काचित्सखी कृष्णवार्तां कथयितुं
माह वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुसरणां अमंदं कंदर्पज्वरजनितचिंता-
कुलतया चलद्बाधां राधां सरसमिदम्मे सहचरी १ काचित्सहचरी सखीमिदमग्रे वक्ष्यमाणम्मेव वाक्यं वचयति किंकुर्वं
करती कम्भिदं सरसं सविलासं यथास्यात् एकस्मिन्काले वसंते मधुकाले कीदृशीं वासंतीमाधवीलता तस्याः कुसुमं तद्व-
त्कोमलै रंगैर्लक्षितां इत्थंभूतलक्षणे तृतीया पुनः कीदृशीम् कांतारे दुर्गमार्गे भ्रमंतीं गच्छंतीं बहुविहितं वारंवारं कृतं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रिणाङ्के ५ हरि० माधविकापरिमलललितेनवमालिकजातिसुगंधौ मुनिमनसामपिमोहनकारिणित
रुणाकारणबंधौ ६ हरि० स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते. वृंदावनविपिनेपरिसर
परिगतयमुनाजलपूते ७ हरि० श्रीजयदेवभणितमिदमुदयतिहरिचरणस्मृतिसारम् सरसवसं
तसमयवनवर्णनमनुगतमदनविकारम् ८ हरि० हे सखि राधे इह सरसवसंते मनोहरमधुसमये हरिः
।। कस्मो विहरति क्रीडति युवतिजनेन समं नृत्यति च कीदृशे वसंते विरहिजनस्य दुरंते दुरंतो निर
वधौ वाचकारोत्राध्याहर्त्तव्यः सकलपुण्याहिरसेनसहवर्तमाने शतिसरस इतिवा युवतिजनेनेतिज्ञाभ
भिप्रायमेकवचनमदुःखेनांतोयस्य कीदृशे वसंते ललितायामनोहरायालवंगलतायाः परि ८
शीलनेनसंबंधेनकोमलोमनोहरोमलयानिलोयत्रतस्मिन् एतेनवासंतस्यसुगंधित्वशीत
लत्वाल्पत्वानिदर्शितानि लवंगलतापरिशीलयतिवालयतीतितंधाद्वित्वात्सः कोम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पिकचितापाठः अत्र चलेतिवाधाशरीरव्यापिनीपीडायस्याः इत्यर्थः कांतारंवनंदुर्गमंनिःपभरः सख्योगनचर
गीतिचरेषः दिशारागविशिष्टाए पदीकमर्थंगीतेनाद गीतस्यास्यरूपकस्तालः तत्लक्षणं शिरवंडिवर्हंचत्रयव
दत्द्रुतप्लुतस्थितंकं तत्तलतोकूरेण इंदीवरश्यामतनुर्विलासीवृन्दर्शिमतंगस्थवसंतरागः १ ललितलवंगल
ले तापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरंवितकोकिलकूजितकुंजकुटीरे १ हरिरिहविहर
तिसरसवसंते नृत्यतियुवतिजनेनसमंसखिविरहिजनस्यदुरंते ध्रुवपदम् उन्मदमदनमनोरथपथिक
वधूजनजनितविलापे अलिकुलसंकुलकुसुमसमूहनिराकुलवकुलकलापे २ हरि० मृगमदसौरभरभ
सवशंवदनवदलमालतमाले युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ३ हरि० मदनम
हीपतिकनकदंडरुचिकेसरकुसुमविकासे मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ४ हरि०
विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतु

12

हेतु श्रीरसंकमावपिइत्यभरः षट्पदभ्रमरालिइत्यपि २ पुनः कीदृशे मृगमदः कस्तूरीतस्य सौ
रभरभसवशंवदः सुरभिनामकस्या यत्र तावाद्दिनीनवानूतनाद दलमालापत्रश्रेणी येषां मीदृशी
तमालास्तमसिंजरवोयत्र नूतनपत्रस्तमालो मृगमदगंधमनुकरोति मृगनाभिर्मृगमदो गं
धश्लेखरमित्यपीति हारावली वशंवदइतिप्रियवशोवदः स्वक्व रिक्वास्वप्यस्येति हृस्वेमुम पु
नः कीदृशे पुवानस्तरुणेजनास्तेषांहृदयंतद्विदारयतीतिनंद्याद्दित्वाल्ल्युः एतादृशो मनसि
जः कामः स्वस्येनखस्येवरुचिर्यस्य एवंभूतानांकिंशुकानांजालः समूहो यत्र षट्युवजनानां
वियुक्तस्तरुणानांहृदयविदारणाय मनसिजस्यनखानांरुचिर्यस्य एवंभूतः पलाशसमूहोय
त्र पलाशकुसुमानांवक्रत्वात्कामनखसाम्यं यद्वा तादृशांकिंशुकजालंकिंशुककलिका य
त्र जालंमुकोरकेसयेजालमानायइत्यपिविश्वः क्षारकोजालकंक्लीबेकलिकाकोरकः पुमा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लोलद्दुमंदराविजितविरहः ध्वनिस्तुलवं गलला कोंनामलुयसुरग्रायोनामकस्तयोराश्लेषस्तेजो
त्कंठोद्दीपनो पुनः कीदृशो भ्रमरसंघेन करंबितो मिलितैः कोकिलैः कूजितैः शाद्वितः कुंज एव
कुटीरोऽल्पाकुटीयत्रासौ यत्र कूजनं कूजस्तन्मितः प्राप्तयबंभस्तः कुंजकुटीरो यत्र इत्यर्थः ध्वा
दिवाल्परूपत्वे इत्स्वेर्नैकुटीशामीशु गम्भीरइतिरप्रत्ययः अल्पाकुटीकुटीरः स्यादिति शाब्द
तः मिलितोपिकरंबितइतिचपुनः कीदृशो उरुगतोमदनमदनोहर्षकामो यत्र तंभतोमनोरथो
यस्यपथिकवधूजनस्यमेनजनित उत्पादितो विलापः परिदेवनं यत्रासौ अथवा उन्मदमद
नस्यमनोरथेनवाञ्छयापथिकवधूजनजनितो विलापो यत्र विलापः परिदेवनमित्यमरः पु
नः कीदृशो अलिकुलैर्भ्रमरसंघैः संकुलो व्याप्तः कुसुमसमूहो यत्र तेन निराकुलो नृनब्रव्यस्तोव
कुलांनांकलापः समूहो यत्र यद्वा नाहशोवकुलः कलापो भ्रवणोयस्य कलापोभ्रवणोव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्यसामंसं इत्याम्नवर्स्मस्तु स्यंगारः स्येतोत्तमः प्रकीर्तित इति भरतः यद्वा गाढ इत्यवलोकनेनत
रुणोः कारुण्येन कृतोल्लासो यत्र करुणा इति भावप्रधानो निर्देशः गतलज्जमकलज्जावलोकने।
नदित्युं करुणापुरूष्यमए वसाध्वनोत्तमस्पुमाहहरपार्वती करुणः पुरस्तात् विश्वेक्रपायांकरुणा
13 मतेति विश्वः पुनः कीदृशो विरहिणां वियोगिनां निकृंतनाय छेदनार्थं कुंतनरवा कृतिश्च
तिकर्मधारयः गाढ शब्देन केनदनुरितात्मा त्यायत्र निकृंतनमित्यत्र नुमागमाभावो वि
धायकस्त्राभावादिति नवाच्यं रदितो नुम्धातो रित्यत्र योगविभागाद्भवति केवोरैदितः ऽ रा ८ क क
तोप्यस्ति केसकाधानस्तो रिति मेघे पांतुंल्यामकठोरकेतककशिरवासंदिग्धमुग्धंदवइति
मालतीमाधवे च कुसुमत्वात् केतकीदनुरितात्मा इति पाठो द्वेतिस्त्रेणामधुरजशदेवधमत्वंद
तुरितोदंतुरितशाकंध्यादित्यान्परह्यत्नं यद्वा गारकादिवादिजिन त्र्यम्पसिनकपिदंतुरि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नित्यमरः ३ पुनः कीदृशो मदनमहीपतेः कामनृपस्य कनकदंडस्य सुवर्णघटितदंडयुक्तछत्र
स्य रुचिरुचिः शोभा यस्य केसरकुसुमस्य नागकेसरपुष्पस्य सजथा तस्य विकाशः प्रादुर्भावो यत्र स
टः नागकेसरस्य कुसुमं विकाशयतीति कर्मण्यण् कनकस्य दंडो यत्र तत् कनकदंडछत्र
मुच्यते कनकं हेमहाटकमित्यमरः केसरो बकुले नागकेसरे स्कंधवालुक इति धरणिः पु
मि नः कीदृशो लिंगितः श्रीलीमुखा भ्रमरा येषु तैः पाटलिपटलैः पाटलापुष्पसमूहैः कृतो विलासः स्म
रनृपविलासः कामनृपशिरवेष्टितं यत्र नृपपक्षे शिलीमुखा बाणाः अलिबाणौ शिलीमु ८
खावित्यमरः ४ पुनः कीदृशो विगलितवासौ लज्जा चेति सा विद्यते यस्य न तस्य संज्ञानं नारका
दिस्पद्गनव पक्ष लज्जितं लज्जाभावेन कः विगलितलज्जितस्य जगतो बुलोकस्य नेन तरुणकरुणो
दुर्बलकरुणावक्षैः पुष्पविकाशव्याजेन कृतो हासो यत्र हासस्य श्वेतत्वान्नरुणकरुणापु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पार्श्वोभ्रमतो गंधोपत्र आशिरि निजनीप्रादुर्भावोस्त्रियांक्लिन्न आजनोर्जा केचित्तु जकारमंतस्थ
पठंति तस्य क्षेवनमालिकयोऽनुभ्रमतयानुगंधयुक्तपेन्यार्थः सगमएव पुनःकीदृक्षो मुनिम
नसामपि स्फीअभिचिन्तानामपि मोहनकारिणो मदनजनके अन्यजनचिन्तानिस्वभावतयेव
14 मोऽवंतितस्थद्यानवनामपि मनोऽभिवसंतोऽस्मै मोऽपनीतिमाहात्म्यंदर्शितम् आह्वित्राद्वे
नतरुणीनांपुथानामकारणंवंधोमरुज्जमित्रे ६ कुत्रविहरामीति स्थानमाहवंशवनविपि
नेवंशवननाम्निवनेहरिर्विहरतीत्यर्थः स्फुरंत्याः शोभमानायाश्चलत्यावा अतिमुक्तलताया
वासंतीलतायाः परिरंभणेनालिंगनेन मुकलितः पुष्पितः पुलकितोलक्ष्यतोपत्र पल्ल
मुकुलमुकुलितभावेनः नस्तुलकोमाच इव संविधत्तेयस्याः तदस्यसंजातमित्तारकादित्वादिइ
तच एवंभ्रमतस्तत्रोपत्र एतेनापि मुक्तलतायानायिकात्वंकृष्णस्य नायकत्वमालिंगनरोमा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मत्तमुन्मत्तं मदनं यो गिरति स भवतीति ध्वनिः निम्नोन्नतेन यात्यापदं तुरंकमतेतु धैर्यमिति धरणिः अत्रापि
लासी शास्त्रयोर्द्वयोर्लता लव्यसकार शकारयोर्ना गणानुप्रासो मंगलं ५ पुनः कीदृशे माधविका
या वासंत्याः परिमलेन गंधेन ललिते मनोहरे वासंती माधवी लतोत्पभ्रमरः अन्येपि पुष्पान माधवी
नाम नायिका तस्याः परिमलेन विमर्दज गंधेन ललितो मनोज्ञो विलसितो वा भवतीति ध्वनिः परि
मलो गंधे विमर्दोत्थेपि सौरभ इति धरणिः ललितो मिलल विलासेन भ्रमस्य यः पुनः कीदृशे न
वमालिका भेवारी ति प्रसिद्धा जातिः सूनामैव प्रसिद्धा तया ति सुगंधो भ्रमनं गंधयुक्ते गंधस्पेदु
स्पृति सुरभि मस्मेति इकारः समासांतः वनमालिका शब्द का प्रसो संज्ञा छंदसो बहुल
मिति बहुलवचनाद्भ्रस्वः ऽर्थ केन कौ वज्ञातिरपि द्विविधा एका वसंते ऽपरा वर्षासु भवति सा मि धेय
म् [illegible] नवमालिकाशब्देन नवमालिका कुसुममुच्यते [illegible] नवमालिका या जातिर्जन्म त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

र्धतत् केसरईषद्धर्द्दरायमिति विश्वः विगलितमाया ईषद्विकसितावाम न्मामल्लिकायावल्लिखलता
सुवर्चद्गिरुरुड्छद्भिः परागैः पुष्परेणुभिः प्रकटितपटवासैः स्फुटितकृतपटवासचूर्णैः अनेनपटवा
सवालेनात्मूर्यदर्शितम पुनः कीदृशः केतकीगंधबंधुः केतकीपुष्पसहचरः एतेनसौरभावकथि
15 तम् पुनः कीदृशः प्रसरतः प्रकटितभवतो ऽसमबाणास्यप्राणावस्माणइव अथवा प्रसरताकाम
बाणेनप्राणवां श्वासोगंधवाहश्चातिकर्म्मधारयः वसंतवायोः स्वभावादेवशीलत्वं अनंतएवकी
तलेनापिदक्षिणानिलेनसहइतिचित्रं परागः कुसुमरेणोस्तूनीयादीरजस्यपीत्यमरः हि
रेणावद्धारणइतिच इहैवचेतोहरजीमार्थः पंचबाणत्वादेवसमबाणात्वं उक्तंचभरते
न हर्षणः पुरुषश्चैव मोहनोमच्छनस्तथा विरहणश्चकामस्यशराः पंचप्रकीर्तिताः प्राणा
नामपिवायुत्वेनगंधवाहत्वंपुनातएवबसंतदिवसानामनंगोद्दीपकतयाविरहिणांदुःसह

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चाभ्यां च कामविकारः सूचितः । तथाहि कंपः स्वेदो रोमांचप्रभृतिभावजन्य तस्थले अनुरागवशाद्धना
माविर्भवतीयोविलासिनिभिरतः । विपिनं काननं वनमित्यमरः । कीदृशे परिसरपर्यंतभुवि परिसर्द्ध
नौगतेन यमुनाजलेन स्नातोपवित्रे एतेन स्थानस्य क्रीडायोग्यता दर्शिता ७ श्रीजयदेवक
वेरिदं भणितं कार्यं उदयति उदितं भवति कीदृशं हरिचरणस्मरणामृतनिरर्जुविंतं संसारो यत्र सारो
धनं त्याज्यं वा पुनः कीदृशं सरसं स्मरसहितं समयवसंतवर्णनं यत्र पुनः कीदृशं अनुरागात् सं
उत्पन्नो मदनविकारः कामविलासो यस्मात् यद्वा सरसश्चासौ वसंतश्चेति योज्यम् ८ अथापि
योगिनां दुःसहं वा पुंकवि वर्ण्यते लाहः दूरविगलितमल्लीवल्लिचंचत्परागप्रकटितपटवा
सैर्वासयन् काननानि इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः १
दूरं वसंतो गंधवाहो वायुर्मे मनो दहति अस्या विरहिणीं कां कुर्वन् काननानि वासयन् सुरभीकु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मृग्यतोरसालोरसालोस्त्रीत्यमरः अंकुरोभिनवोद्भिदित्यमरः काकलीतुकले सूक्ष्मेध्वनौतुमधुरास्फुटे
इतिच ऊर्ध्वमिदमिति गुरगोल्कः कलतइत्यनेः रपरः रुतंभानिष्ठानोनइतिनिष्ठानस्वनः पार्पः
परपिककइत्यमरः स्त्रीविंदिवसवासरावितिच भावनावकुंजज्ञानेनविरहेरागः कांताविरहे
कान्त्यवोध्यानइतिप्रसिद्धमेव विरहविधुरायेमाधवं सखीदर्शयति अनेकेनारीपरिरंभसंभ्रमः
स्फुरन्मनोहारिविलासलालसम् मुरारिमारादुपदर्शयंत्यसौ सखीसमक्षंपुनराहराधिकाम्
१ असौसखीपुनरिहंगीमेकृष्णमारातराधिकामाहोल्कवती कीदृशी आरहरेसमक्षंप्रत्यक्ष
यथास्यात यावत्समुपदर्शयंति ज्ञानविषयंकारयंती कीदृशंहरिं अनेकेनारीणांपरिरं
भसंभ्रमआलिंगनादरेणस्फुरन्निजस्तनोगच्छत्दीप्यमानोवासचासौमनोहारिविलासला
लसम्भ्रममनोज्ञक्रीडाबोर्छत्यशितसः संभ्रमंगयपतिछतिभयमुद्वेगमादरमितिशाश्वतः

16

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्वं वसंते पुनराह उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलक
लैरुद्गीर्णकर्णज्वराः नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमा
गमरसोल्लासैरमी वासराः १ अमी वसंतसंबंधिनो दिवसाः पथिकैः पांथैः कथंकथमपि अतिवं
चनीयप्रकारेण कष्टस्त्वापवनीयंते वाहंते दुर्लंघनात् पुनराह कीदृशाः उन्मीलन्मधुगंधेउ
द्गच्छन्माध्वीकरसे लुब्धैः सतृष्णैर्मधुपैर्भ्रमरैर्व्याधूतेषु कंपितेषु चूतांकुरेषु क्रीडतां कोकिलानां
काकलीकलकलैः सूक्ष्मध्वनिमधुरकोलाहलैः कष्टजनकजनेकर्णेन उद्गीर्णः प्रकाशितः कर्ण
ज्वरः श्रवणोपतापो येषु दिनेषु तेन पाकथंनीयन्त इत्यत आह ध्यानेन चिंतनेन अवधानमेकचित्तता
तत्पादक्षणप्राप्ताः सूक्ष्मकालमनुभूतायाः प्राणसमायाः जीवितसदृशायाः कांतायाः समागमरसे संबंध
रस उल्लासे हर्षे इत्यग्रिभिः मधु पिबतीति मधुपः आतो ऽनुपसर्गे कः व्याधूतेति धूतं कंपनं नेत्रः त्वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी॰गो॰ तले पुलकोन्मोऽभेरन्कुलेकान्तेप्रेकथके एतेनतस्यापितदीयसंगमात्सात्विकभावोजातइत्युक्तं नितंबवतीति
रम॰ प्रशंसायामतिशयेनवामतुप् श्रवः स्वलस्योरस्त्रीतलंस्यादित्यमरः श्रुतिःश्रवणवेदयोरितिधरणिः ५ कापिचगो
पीकरेणहरिनेनामुं दुकूले पट्टवस्त्रे विचकर्ष आकृष्टवती केनहेतुना केलिकलाकुतुकेक्रीडाविलासकौतुकेनर
१९ रन्तुमिच्छयाऽङ्गारत्थेर्वाञ्छितेनेत्यर्थमेवाकृष्टवतीतिभावः कुत्र यमुनाजलकूले कालिंदीविपिनोपलक्षिततीरे कुतुकं
चकुतूहलमित्यमरः चकारः पूर्वापेक्षयासमुच्चयार्थः मनोरमंमञ्जुमञ्जुलमितिन वञ्जुलो वकुलेख्यातोवञ्जुलेवेतसेमत
17 इतिधरणिः दुकूलंपट्टवाससीतिन वनंकाननतोययोरितिन केचित्तुदुकूलेइतिकर्मत्वेनयोजयंति तेदुकूलेगृही
त्वाहरिमाकृष्टवती रहोपविष्टेतिकृत्वाहरिमालसमीपंनिनायेतिवाक्यं अत्रगृहीत्वेत्यध्याहारस्यगौरवमित्ययान्
तरिजीते ५ कापिनतरुणीहरिणाहसितेनप्रशंसाप्रशंसिता कीदृशीरसरसेगोपक्रीडानुरागेसहन्तस्यपराक्रमस
मकालंनृत्यंती कीदृशे करतलयोस्तालेनचपेटखानेनजाततरलया चंचलया वलयावल्याकटकश्रेण्या कलितः संयुक्तः कल
स्वनवंशोव्यक्तमधुरशब्दसहितवेणुर्यस्मिन् तलश्चपेटस्तालश्चतल्पेधोरयोस्त्रलमितित्रास्वतः रासे कोलाहलध्वा
नेक्रीडायामपिगोपिगणोहोमीतिविश्वः प्रशंसातुस्मायियंनृत्यतीत्येवंतापायकपवक्षोनेकासांप्रीणकोजातइत्याह इ
कामपिगोपींश्लिष्यति आलिंगति कामपिरामांतरुणींचुंबति कामपिरमयतिक्रीडयति सास्मितचारुसमरमनोहरं राम॰
१९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

केलिनाचलंती माणिमुक्ते कुंडले ताभ्यां भूषितं गंडयुगं यस्य स्मितशाली ईषद्धास्ययुक्तवानच्चापि कर्मधारयः स्मितशा[illegible]मिदं ईषद्धस
ने कांतः केचित्तु स्मितमीषद्धासं बिभर्ति तस्यैत्यर्थं शा[illegible]दि पतत्य पत्ताकृताहीयइति वदंति मुग्धो[illegible]सुंदरगवाति विश्वः वधूर्जाया
स्नुषा स्त्री चेत्यमरः अनेकार्थवत्सामान्य स्त्रीवाचको वधूशब्दः यद्वाः केलिः पुरः परमप्रकृतधा यस्य तस्मिन् अन्योन्यनिर्भरविला
सबंधुगोपीनां वेष्टितमाह १ काचित्कोपवधूः पीनपयोधरभारभरेण विपुलप्रमोदभरेण वा तीव्रायेण सरागं सानुरागं यथा स्यात्तथा आह
रिं परिरभ्य पुलकमा[illegible]ं मोरं वितपंचम रागं अनु[illegible]लितं पंचमाख्यस्य रागस्य पश्चाद्गायति गानं करोति हसेन प्रागुच्चरितः
पंचमराग स्तदनंतरं तया गीतमिति भावः शृंगारे पंचमस्वरबाहुल्यमिति सर्वकाभितः तथा च भरतः मध्यं पंचमभूयिष्ठं हास्यशृं
गारयोर्भवेदिति पंचमो रागभेदे स्यात्पंचानामपि पूरणे पंचमस्त्वनुरे[illegible]पंचमी पांडवस्त्रियामिति विश्वः २ कापि मुग्धवधू
ता मुग्धवधूर्मनोहरयुवतिरधिकमतिशयितं यथा स्यादेवं मधुसूदन वदनसरोजं [illegible]कमलं ध्यायति चिंतयति कीदृशं वि
लासविलोलयोः कलास्वतिरहसयोर्विलोचनयोः अक्ष्णोः खेलनेन संचारेण जनितउत्पादितो मनोजः कामो येन तत् शंबरारि
र्मनसिजः कुसुमेषुरनन्यजइत्यमरः वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखमिति च स्मरतिजातं सा सिज अनेन ३ कापि निजयुवती
कीदृशितं प्रियं [illegible]कपोलतले गंडदेशे चारुमनोज्ञं यथा स्यात्तथा चुंबनं चुंबितवती कीदृशी किमपि कार्यांतरं लपितुं कथितुं श्रुतिमूले
कर्णमूले मिलिता संलग्ना निःकलपकांत कांतचुंबनं हि सर्वो जनहास्यकरमिति भाजनं तदारब्धमिति भावः कीदृशे कपाले

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी॰गो॰टी॰ गांभिन्नं भवपदमित्याह शृंगारोपि न तादृश एव भवतीति तन्नापि संबंधोऽन्यत् शृंगारः स्मरतेनाथ रसे च गजमंडने विश्वः पुंसः
रामः स्त्रियां स्त्रियः पुंसि संभोगं प्रति या स्पृहा स शृंगार इति रत्यात्मा रतिक्रीडादिकारणमिति वा श्यामो भवति शृंगारः श्वेतो हास्य
एकः प्रकीर्तितः विष्णुहृदः सर्वार्थः संसारवारीचः इंदीवरं तु नीलोत्पलमित्यमरः कालश्यामलमेचकाः इति च प्रसंगोपसन्न
२० त्वयोः मूर्त्तिः कांतिरूपकाययोः मधुरेणो मधुरैत्यो मधुकोपि मधुर्मतः प्रत्यंगमिति वीप्सायामव्ययीभावः मलयानिल
स्य दुःसहत्वे हेतुमाह अयोत्संगवसद्भुजंगकवलक्लेशाच्चलं प्रालेयप्लवनेच्छया प्रसरति श्रीखंडशैलानिलः किंचित्स्निग्ध
18 रसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलंति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः १ अथेदानीं वसंते श्रीखंड
शैलानिलो मलयाचलपवनउत्संगे क्रोडे च वसंतो पतिष्ठमाना ये भुजंगाः सर्पास्तेषां कवलक्लेशाद्ध्वंसो पतापादिव ईषत् श्री
लवांहिमगिरिं प्रालेयप्लवने च्छया तुषारमज्जनेच्छयाऽनुप्रसरति इवशब्द उत्प्रेक्षाव्यंजकः तदुक्तं मन्ये शंके ध्रुवं प्रायो नून
नामित्येवमादिभिः उत्प्रेक्षाव्यंजनेऽशब्दैरिवशब्दोपि तादृश इत्युत्प्रेक्षालंकारोऽयम् यथा अन्यथैवास्थितावृत्तिश्चेतनस्येतरस्य
वा अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्बुधाः इति न केवलमिदमेवेदमपरमपि संपन्नमित्याह किंचेति पक्षांतरे पिका
नां कोकिलानां गिरो वाण्यः उन्मीलंति स्फुरंति कीदृश्यः कुहूः कुहूरिति कलोत्तालाः कुहूः कुहूरित्याकारेणाव्य
क्तमधुरस्वरेणोत्तालाः अविस्मृताः प्रकटा वा केचित्तु कुहूः कुहूरिति गिर उन्मीलंति कीदृश्यः कलोत्तालाः कलाम रामः
२०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यथास्याद्देवं परांश्चेत्पश्यति अपरामन्यां वामां तरुणीमद्दिक्स्थितां वा अनुगच्छति पश्चाद्यातीत्यर्थः वा मतयेव हठ इति रिरंस
तोस्याः पश्चात्भ्रमनं अर्द्दितोगमतो वामो रामायाः क्षिप्तकीर्तितिाइतिध्वरणि: ७ श्रीजयदेवकवेरिदं गीतं शुभानि वितनो
तु कल्याणानि वर्द्धयतु अर्थाज्जायतां श्रवणतां च कीदृशमद्भुतमाश्चर्यकरं कृष्णस्य केलिरहस्यं क्रीडाहर्षो यत्र गोपीमंड
लारासे हास्येन युगपत्सर्वासां केलिना प्रीणनादाश्चर्यम् पुनः कीदृशं विपिनविनोदके तया वनविहारे कौशलेन वलितं
संभक्तं कचित्तु वृंदावनविपिने ललितमिति पाठः तत्र वृंदावनभाग्निवने ललितं नानारसान्वितमित्यर्थः पुनः यत्रा
स्य यशः सहितं साधु वा तत्रा हितमिति यत् ८ अधुना सर्वाराधाये कृष्णकेलिप्राचुर्य्यं पुनः कथयितुमाह। विश्वेषामनुर
ंजनेन जनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवम् स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः
शृंगारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीडति १ हे साखि राधे मधौ वसंते मुग्धो मनोहरो हरिः क्रीडति कइव मूर्त्तिमान्श
रीरश्रृंगाररसइव किं कुर्वन् अनुरंजनेन नानुरागेण विश्वेषां बहुजनानां संसारिणां वा हर्षं जनयन्नुत्पादयन् पुनः किं कु
र्वन् इंदीवरश्रेणीनीलनलिनमालावत् श्यामकोमलैः कृष्णमनोहरैरंगैरवयवैरनंगोत्सवं कामहर्षमुपनयन्नुपस्था
पयन् कीदृशः स्वच्छंदव्रजसुंदरीभिः स्वतंत्रगोपीभिरभितः सर्वतोभावेन प्रत्यंगं प्रत्यवयवं व्यालिंगितः गोपीभिरेकदालिं
गनं यथा यदंगं लब्धं तया तया तदेवालिंगितमिति प्रत्यंगमालिंगितो भवति कश्चित्तु स्वच्छंदमिदमित्यलिंगेना क्रियाविशेष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तिद्रायंपरिहातुमहमसखीमाह विहरतिराधासाधारणप्रणयेहरौविगलितनिजोत्कर्षादीर्ष्यावशेनगतान्यतः क्वचिदपिलता
कुंजेगुंजन्मधुव्रतमंडलीमुखरशिखरेलीनादीनाप्युवाचरहःसखीम् १ राधासखींरहोगोप्यंगीतेनप्रमाणानुवाचेक्तवतीवचध
तुर्द्विकर्मकः कीदृशीवनेवृंदावनेहरौकृष्णेविहरतिक्रीडतिसति ईर्ष्यावशेनाऽसहिष्णुतयाऽन्यतोगताऽन्यत्रचलिताकीदृशे
हरौसाधारणप्रणयेअन्यगोपीतुल्यप्रेम्णि कुतईर्ष्येतिआह विगलितनिजोत्कर्षादहमेवातिशयप्रणयिनीतिवर्द्धमानाभावात्
क्वचिदपिलताकुंजेलीना कुत्रापिलतापिहितोदरगृहेतिरोहिता यद्यपिकुंजशब्देनैवलतापिहितगृहमुच्यते एवंलता
शब्दोव्यर्थस्तथापितृणादिपिहितगृहनिवारणार्थंलताशब्दोपादानम् अतएवनिकुंजकुंजौवाक्लीबेलतादिपिहितोदरइत्य
त्रादिशब्देनतृणादिपरिग्रहःक्लीबे कीदृशि कुंजेगुंजतांकलध्वनतांमधुव्रतानांभ्रमराणांमंडलीभिःसंघैर्मुखरंवाचालंशिख
रमग्रभागोयस्यतत्र कीदृशीदीनापिसोत्कर्षांप्रणयवतीमांतिरस्कृत्यान्यगोपीषुतुल्यप्रणयोहरिरितिदुःखितापी
त्यर्थः यद्यपिदीनातथापितत्परिहासादिनावशीकृतहृदयातद्गुणंकीर्त्तयतिस्मेतिभावः अन्यतइतिचन्यादिभ्यउपसंख्यान
मितित्तसप्रत्ययात्तसिः स्यान्मंडलंद्वादशराजकेचदेशेचबिंबेचकदंबकेचेतिविश्वः मंडलंत्रिषुवर्गस्यमरः गीतेनश्लोकोक्तमेवार्थ
वाच स्फोरयति गीतस्यास्यगुर्जरीरागः रूपकस्तालः संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशम् २ चलितदृगंचलचंचल गं
मौलिकपोलविलोलवतंसम् १ रासेहरिमिहविहितविलासंस्मरतिमनोममकृतपरिहासम् १ ध्रुवपदं चंद्रकचारुम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

धुराऊज्ञानाउऊतध्वनयइत्यर्थः इतिवदंतिकस्मात् स्निग्धरसालमौलिमुकुलानिकोमलचूतमस्तकमुकुलान्यालोक्यहृष्टा
हर्षोदयानंदोऽस्मात् क्वचिदध्रुवसंगतिपाठः सचपेशलः अद्रिपदस्पर्शेवर्णात् ईशमचलमितिईशमद्रीनावचरप्रतिमुस
ग्निः प्रालेयंमिहिकाचाथहिमानीहिमसंहतिरित्यमरः श्रीखंडेनोपलक्षितःशैलःश्रीखंडशैलः आम्रश्चूतोरसालोऽसौ इत्य
मरः इदानींसर्गांतेकथाप्रक्रमस्यस्कोकविर्लोकानाह रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णंपरिरभ्य २
निर्भरमुरःप्रेमांधयाराधया साधुत्वद्वदनंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः
हरिःहरोयोयुष्मान्पातुरक्षतु कीदृशरासोल्लासौभरेणगोपक्रीडायांहर्षातिशयेनविभ्रमभृतांलालित्यवतीनांशृंगारभाव
धारिणीनामाभीरवामभ्रुवांगोपांगनानामभ्यर्णसमीपेनिर्भरंगाढंयथास्यात्तथोरोवक्षस्थलंपरिरभ्यालिंगपराधयोद्भटचुंबि
तःप्रकटेनचुंबितः कीदृश्याप्रेमांधयाऽनुरागातिशयेन नेत्रहीनयैवकथंचुंबितइत्यतआह गीतस्तुतिव्याजाऽऽनप्रशंसाछले
न किंसत्वात्वद्वदनंसुधामयममृतमयंसाधुशोभनमितिव्याहृत्योक्तिः कीदृशोहरिः स्मितमनोहारीतस्याभुवनकोशलम
कलय्यस्मितेनमनोहर्तुंशीलंयस्य वाभिमनोहरेष्वकोवोयासां अभ्यर्णनिकटेअजिरेधराणिः पातुतिशासायांलोट् अस्तत्य
स्त्रगुणीशोनानागुणोन्मादमयतिकापि जगन्नाथतस्यकृतोवरसोसर्गोनिसर्गोज्वलआदिमोयम इतिश्रीमहामहोपा
ध्यायधर्माधिकरणिकजगन्नाथविरचितायांसारदीपिकायांगीतगोविंदटीकायांप्रथमःसर्गः॥१॥अथनाराधाहरौभावा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी॰गो॰टी॰

राम॰ २ २२

रेण वेष्टिताः केशा यस्य तं गोपबालकानां शोभार्थं मयूरबर्हैः केशा बध्यंते अतएव प्रचुरेण वितीर्णेन पुरंदरधनुषा शक्रचापेना
नुरंजितः खचितो मेदुरः सांद्रः स्निग्धो वा यो ऽम्बुदो मेघस्तस्येव सुंदरो वेषो यस्य तम् केशाग्रमिति रूक्षतया चिक्कणतया प्रा
चुर्येण च ताडृशमेघसादृश्यम् रूक्षेन तथाविध केशावत्ता वा सादृश्यम् भयव्यापिना विशेषः इन्द्रस्य अंडकः इन्द्रस्यार्थकेन शि
खंड एव शिखंडकः स्वार्थेकन् त्रिभिदास्त्रेहहने भंजमाक्षामी दोषरुच निर्दगुरगाः सांद्रस्निग्धस्तुमेदुरावितिक्षरणाः घनजी
मूतमुदिरेत्यमरः २ पुनः गोपकदंबस्य वल्लवसंघस्य नितंबवतीनां मुग्धाशानितं च युक्ते स्त्रीणां मुखचुंबनेन लोभितः प्रापितो
लोभो येन तं पुनः बंधुजीवकं बंधूकपुष्पमिव मधुरः प्रियोऽधरपल्लवो यस्य तं अतिलोहितत्वात् सुकुमारत्वाद् अतिमनोहरत्वा
च्च बंधुजीवसादृश्यमधरस्य पुनः उल्लसिता द्युतिर्नीलिता शोभा हास्यश्रीर्यस्य तम् स्वादुप्रियौ तु मधुरावित्यमरः सुंदरो वा म
धुरो स्वादुशोभनावितिविश्वः बंधूको बंधुजीवक इत्यमरः ३ पुनः विपुलः समधिकः पुलको रोमांचो यत्र ताडृशेन भुजपल्लवेन
वलयितं वेष्टितं वल्लवयुवतीनां गोपतरुणीनां सहस्रं येन तम् पुनः करे च चरणे च उरसि च हृदये च मणिगणैर्भूषितं नांगानामित्येव
बहुभावः तत्र स्थितानां मणिगणानां सहितं स्वर्णानां किरणेन दीप्त्या विभिन्नम् अतिशयितं तमिस्रं अंधकारं येन तम् दीर्घत्वेन
मनोहरतया कोमलत्वेन च पल्लवसादृश्यम् उभयोः भित्तौ दारितं संगता वित्यमरः तमिस्रं तिमिरं तमः इति च ४ पुनः जलदपटले
जलदसंघे चलतः संभ्रमत इंदोश्चंद्रस्य विनिंदकं तुल्यं चंदनकृतं तिलकं यत्र ताडृशं ललाटं यस्य तं गोपीनां तिलकं वर्तुलमेव ब्रा

रामः २२

20

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मूराशिखंडकमंडलवलयितकेशम् २ प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशम् रासे० २ गोपकदंबनितंबवतीमुखचुंबनलं
भितलोभम् २ बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ३ रासे० विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम्
करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रम् ४ रासे० जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटम् २ पी
नपयोधरपरिसरमर्द्दननिर्द्दयहृदयकपाटम् ५ रासे० मणिमयमकरमनोहरकुंडलमंडितगंडमुदारम् २ पीतवसनमनुग
तमुनिमनुजसुरासुरवरपरिवारम् ६ रासे० विशदकदंबतले मिलितं कलिकलुषभयं शमयंतम् २ मामपि किमपि तरंग
लि५
दनंगदृशा मनसा रमयंतम् ७ रासे० श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपम् २ हरिचरणस्मरणं प्रति संप्रति पु
ण्यवतामनुरूपम् ८ रासे० पंचमगीतम् मम मनः हरिं लक्षं स्मरयति कीदृशमिह रासे गोपक्रीडायां विहितविलासं कृ
तक्रीडम् पुनः कीदृशं कृतपरिहासं विहितविभ्रमम् पुनः संचरदधरसुधामधुरेणाधरामृतमनोहरेण ध्वनिनादेन
मुखरितो मोहननामा वंशो येन तं मोहयतीति मोहनः नंद्यादित्वाल्ल्युः पुनः वलितमावर्जितं दृगंचलमपांगो यस्य चंचलं
अपूर्लमौलिः शेखरं यस्य कपोले गंडे विलोलश्चंचलो वतंसः कर्णपूरो यस्य ततः प्रत्येकं कर्मधारयः वतंसोऽवतंसः वष्टि भागु
रिरल्लोपमवाप्योरुपसर्गयोरित्यकारलोपः पीयूषममृतं सुधेत्यमरः अग्रभागोपि चंचलमिति धरणिः मौलिः किरीटे ध
म्मिल्ले इति विश्वः १ पुनः चंद्रकेण विचित्रवस्तुचिह्नेन चारुणा शोभमानानां केकिपिच्छानां मंडलेन संघेन वलयिता वलयाका

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी॰गो॰टी॰
राम:
८
२२

स्वभावोसौंदर्य्यं नानाकेपक्ष्मभेदयोरितिविश्वः पक्ष्मनाभोमधुरिपुरित्यमरः ८ अधुनोत्कंठिताराधाकृष्णेचलंतंकृष्णंतसौना
यन्नामाह गणयतिगुणग्रामंभ्रामंभ्रमादपिनेहतेवहतिचपरितोषंदोषंविमुंचतिहतः युवतिषुचलत्तृष्णेकृष्णेविहा
रिणीमांविनापुनरपिमनोवामंकामंकरोतिकरोमिकिम् १ ममममनोयत्तंकर्तृपुनरपीदानीमपिकृष्णेकाममभिलाषंकरो
ति तत्रकिंकरोमिकिमुपायंतत्करोमिमानायत्तिरितिभावः कीदृशेकृष्णेयुवतिषुतरुणीष्वन्ययुवतिषु चलतृष्णेजाताभिला
षे पुनःकीदृशेमांविनामांत्यक्त्वाविहारिणीक्रीडनशीले कीदृशंमनः वामंविरुद्धंमनायत्तमितियावत् वामत्वेहेतुमाह यस्मा
दिदंममननः कर्तृसापराधस्यापिकृष्णस्यगुणग्रामंरूपादिकंरतिकलाकौशलादिकंवागुणास्तेषांग्रामंसमूहंगणयतिसंख्या
युक्तंकरोतीत्यर्थः भ्रमादपिभ्रांतेरपिभ्रामंभ्रमंविस्मरणंनेहतेनचेष्टतेतद्दैवतत्कृतमेवमनइतिभावः क्वचिद्भ्रामेमितिपाठस्तत्र
क्रेभामक्रोधंनेहतेनवांछतिभामक्रोधेभावेघञ् परितोषंमहतीप्रीतिंचधारयतिदोषंमदीयावधारणादिकंहतोविमुंचति
परित्यजति नीसर्गेपद्ययेसानुरागंहृदयमितिवामत्वम् गुणाः प्रधानेरूपादौमौर्व्यांसूदेवृकोदरे गुणःसत्वादिसंध्यादि वि
द्यादिहरितादिष्वितिविश्वः भ्रमस्तुसंभ्रमेप्रोक्तःसम्मोहेपिनिगद्यतइतिधरणिः भ्रमस्त्वभ्रामःप्रमादेस्यादित्यमरः अकामोनु
मतोकामइत्यमरः उत्कंठितानामनायिकेयथा लक्षणंचतस्याः उद्दामंमन्मथमहाज्वरवेपमानारोमांचकंटकितमंगमभाव
हंतीम् सस्वेदवेपथुघनोत्कलिकाकुलांगीमुत्कंठितांवदतितांभरतःकवींद्रइति अधुनाकामपीडामसहमानाराधासखीमाह

21

राम:
२३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योभवति पुनः पीनानांमांसलानांपयोधराणांस्तनानांपरिसरस्य पर्य्यन्तदेशस्यमर्द्दनेनिर्दयंहृदयंकपाटंकठोरंतथाकपाटमि
वहृदयंयस्यतम् अत्रपरिसरछलेनगाढालिंगनंसूचितम् विनिंद्यतीतिविनिंदकः तुल्यतयः तिलकंचिन्हंकेशाकुलंकामे
तिलकालकइतिविश्वः ५ पुनः मणिमयमकराकाररत्नकृतमकराकारेणमनोहराभ्यांकुंडलाभ्यांमंडितोलंकृतोगंडोयस्यतं
पुनः उदारंमहांतमभीष्टंदातारंवा पीतवसनंवस्त्रंयस्यतम् अनुगताआश्रितामुनयोयस्यमनुजालोकाः सुरादेवाअसु
राराक्षसाश्चयेतेवराःश्रेष्ठाः परिवाराःपरिजनायस्यतम् परिवारःपरिजनेपरिच्छेदप्रकर्षयोरितिविश्वः ६ पुनःविशदक
दंबतलेविमलकदंबतरोर्मूलेमिलितमुपस्थितम् पुनःकलिकलुषात्कलिकालजातपापाद्भयंभीतिंशमयंतम् पुनः माम
पिमानाद्दृश्यामपिकिमप्यानिर्वचनीयंयथास्यात्तथातरंगवदंगंयस्याताद्दृशयादृशाद्दृष्ट्यामनसाचित्तेनचरमयंतं मनसा
कराभ्यांतेनरमयंतमितितात्कालक्रियायावर्त्तमानत्वेनवर्त्तमाननिर्देशः कुरंगदृशेतिपाठेत्वासहसेतिकवित्याह तत्रकु
रंगदृशाहरिणचक्षुषासहसासत्वरंयथास्यात्तथामनसारमयंतीत्यर्थः शीघ्रत्वेसहसाव्ययमितिधरणिः कलुषंवृजिनै
नोघइत्यमरः ७ श्रीजयदेवभणितंगीतमिदंकर्त्तृएताद्दृशंभवतीत्यन्वयः कीद्दृशमतिसुन्दरम् मोहनंमोहजनकंमधुरिपोः
कंसस्यरूपंयत्रतत् संप्रतिकलियुगेहरिचरणस्मरणंप्रतिपुराणवतांधार्म्मिकाणांमनुरूपंयोग्यंकलियुगमाहात्म्यमनुपम
बुधानांविष्णुस्मरणमेवश्रेयस्करमितितद्दर्शिनोमिदंगीतमतिशुभदमितिभावः मोहयतीतिमोहनः नंद्यादित्वाल्युः कंस

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गी.गो.टी. राम च २४ दैवेयनोत्सवकेतथा नवन्तमकथ्यकेलोविहारोद्यानसंगतो असतीसंकुलेदेशेरस्तुत्पाताधुपहले चौरिकाद्याभिसरस्मात्तद्दो निर
रक्षावदिति पुनः कीदृशं कक्षं निबिडं चौरहासिगोप्यस्थानिनिलीयतिरोहितीभयवसंतोतिष्ठतं एवंभूतंमांनकश्चित्पश्यतीतिसंकु
चितमात्मानंकृत्वावस्थितमितिभावः कीदृशामया चकितेन चमत्कृता विनोकितानिरीक्षितादिशोयया कुत्रकोनिलीयतिष्ठ
तीतिकृत्वाथास्वयमेवाभ्यर्थकांतमनुसरतीतिलज्जयासखीभुगोपनार्थमेवेतिभावः कीदृशांरहःसंरतिरभसरसेन रतौसुरतौरभसोवे
ग उत्साहोवातस्यरसेनायत्तावारसेनानुरागेणावाहसंतम् निरंतरंरहएकांतमितिपराशीः निलीयतीतिलिङ् आशिषघणोनिपू
